# Vishnukritam Shiva Stotram 2

# विष्णुकृतं शिवस्तोत्रम् २

## Document Information

Text title : Vishnukritam Shiva Stotram 2

File name : viShNukRRitaMshivastotram2.itx

Category : shiva, stotra, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 11 | 550-568||

Latest update : March 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2024

*sanskritdocuments.org*

# विष्णुकृतं शिवस्तोत्रम् २

विष्णुरुवाच -
नमामि विश्वेश्वरमादिदेवं नमामि विश्वोत्तममीशमेकम् ।
नमामि सर्वाधिकमप्रमेयं नमामि शम्भुं गिरिजासहायम् ॥ ५५० ॥

नमामि कालान्तकमुग्रमीशं नमामि खट्वाङ्गधरं महेशम्
नमामि सोमानलभास्कराक्षं नमामि वाहीकृतसन्महोक्षम् ।
नमामि सर्वाधिककण्ठभूषं नमामि नानाविधदिव्यवेषम्
नमामि शुद्धोत्तमभूतिभूषं नमामि संरक्षितभूतशेषम् ॥ ५५२ ॥

नमामि सर्वाङ्गमवेद्यमाद्यं नमामि मायारहितं विशुद्धम् ।
नमामि लोकैकनिदानभूतं नमामि नानाविधसृष्टिहेतुम् ॥ ५५३ ॥

नमामि नागेशसमर्चिताङ्घ्रिं नमामि शुद्धेन्दुकलावतंसम् ।
नमाम्यनेकेन्दुरविप्रभासं नमामि नित्यं करुणार्द्रभावम् ॥ ५५४ ॥

नमामि रम्योत्तमवक्रचन्द्रं नमामि दीर्घोरुहिरण्यबाहुम् ।
नमामि शान्ताच्छहिरण्यरूपं नमामि दिव्योरुहिरण्यवर्णम् ॥ ५५५ ॥

नमामि सोमं वृषराजकेतुं नमामि शर्वं वरधर्मसेतुम् ।
नमामि भीमं जगदेकनाथं नमामि रुद्रं जनमोक्षहेतुम् ॥ ५५६ ॥

नमामि वीरेश्वरमुग्रवीर्यं नमामि देवं भवनीलकण्ठम् ।
नमामि सर्वातिहरं सुरेशं नमामि दीर्घोरुजटाकलापम् ॥ ५५७ ॥

शिव एव शरण्यपुण्यमूर्तिः शिव एवाखिलदेवचक्रवर्ती ।
शिव एव विदारितामरार्तिः शिव एवाखिलवेदगीतकीर्तिः ॥ ५५८ ॥

त्वदन्यं शरण्यं वरेण्यं न जाने न जाने शिवामेयकुध्रेङ्गजाने ।
त्वदन्यो न देवस्त्वदन्यौ न देवस्त्वदन्यो न देवस्त्वदन्यो न देवः ॥ ५५९ ॥

त्वमेव प्रभुः सर्वलोकैकनाथस्त्वमीशस्त्वमाराध्यभूतस्त्वमेव ।

त्वदन्यो न पूज्यस्त्वदन्यो न पूज्यस्त्वमेवासि पूज्यस्त्वमेवासि सेव्यः ॥ ५६० ॥

त्वदन्यत्परं वस्तु मास्त्येव लोके त्वदन्यो न वेदान्तवेद्यः परेशः ।
त्वमेवासि सर्वं त्वदन्यन्न किञ्चिद्ध्रुवं सत्यमेतद्ध्रुवं सत्यमेतत् ॥ ५६१ ॥

शिवात्परं नेति वदन्ति वेदाः शिवात्परं नेति वदन्ति देवाः ।
शिवात्परं नेति वदन्ति सिद्धाः शिवात्परं नेति वदन्ति शुद्धाः ॥ ५६२ ॥

शिव एवाखिलाराध्यः शिव एव जगत्प्रभुः ।
न शिवात्परमस्त्येकं सत्यं सत्यं मयोच्यते ॥ ५६३ ॥

शिवाज्ञयैव सूर्योऽयं तपति प्रतिवासरम् ।
शिवाज्ञयैव चन्द्रोऽयं दीपयत्यखिला दिशः ॥ ५६४ ॥

शिवाज्ञयैव शैलेन्द्राः फणिदिक्करिणः सदा ।
धृत्वा तिष्ठन्ति पृथिवीं भीत्या कम्पितमानसाः ॥ ५६५ ॥

शिवाज्ञयैव नितरां प्रज्वलत्यनलः सदा ।
शिवाज्ञयैव वान्त्येते वायवः सुखहेतवः ॥ ५६६ ॥

शिवस्यैव प्रसादेन देवेन्द्रः सर्वपालकः ।
शिवस्यैव प्रसादेन सर्जकोऽपि प्रजापतिः ॥ ५६७ ॥

शिवस्यैव प्रसादेन मया प्राप्तं परं पदम् ।
शिवस्यैव प्रसादेन शम्भुः शम्भुत्वमाप्तवान् ॥ ५६८ ॥

॥ इति शिवरहस्यान्तर्गते विष्णुकृतं शिवस्तोत्रं सम्पूर्णम् ॥

- ॥ श्रीशिवरहस्यम् । उग्राख्यः सप्तमांशः । अध्यायः ११ । ५५०-५६८ ॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 11 . 550-568..

Proofread by Ruma Dewan

*Vishnukritam Shiva Stotram 2*

pdf was typeset on March 8, 2024

Please send corrections to *sanskrit@cheerful.com*